# મંત્ર પુષ્પમ

યો'ઽપાં પુષ્પં વેદ' પુષ્પ'વાન પ્રજાવા"ન પશુમાન ભ'વતિ । ચંદ્રમા વા અપાં પુષ્પમ" । પુષ્પ'વાન પ્રજાવા"ન પશુમાન ભ'વતિ । ય એવં વેદ' । યોઽપામાયત'નં વેદ' । આયતન'વાન ભવતિ ।

અગ્નિર્વા અપામાયત'નમ । આયત'નવાન ભવતિ । યો"ગ્નેરાયત'નં વેદ' । આયત'નવાન ભવતિ । આપોવા અગ્નેરાયત'નમ । આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

વાયુર્વા અપામાયત'નમ । આયત'નવાન ભવતિ । યો વાયોરાયત'નં વેદ' । આયત'નવાન ભવતિ । આપો વૈ વાયોરાયત'નમ । આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

અસૌ વૈ તપ'ન્નપામાયત'નમ આયત'નવાન ભવતિ । યો'ઽમુષ્યતપ'ત આયત'નં વેદ' । આયત'નવાન ભવતિ । આપો' વા અમુષ્યતપ'ત આયત'નમ ।આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

ચંદ્રમા વા અપામાયત'નમ । આયત'નવાન ભવતિ । યઃ ચંદ્રમ'સ આયત'નં વેદ' । આયત'નવાન ભવતિ । આપો વૈ ચંદ્રમ'સ આયત'નમ । આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

નક્ષત્ર'ત્રાણિ વા અપામાયત'નમ । આયત'નવાન ભવતિ । યો નક્ષત્ર'ત્રાણામાયત'નં વેદ' । આયત'નવાન ભવતિ । આપો વૈ નક્ષ'ત્રાણામાયત'નમ । આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

પર્જન્યો વા અપામાયત'નમ । આયત'નવાન ભવતિ । યઃ પર્જન્ય'સ્યાયત'નં વેદ' । આયત'નવાન ભવતિ । આપો વૈ પર્જન્યસ્યાયત'નમ । આયત'નવાન ભવતિ । ય એવં વેદ' । યો'ઽપામાયત'નં વેદ' । આયત'નવાન ભવતિ ।

સંવત્સરો વા અપામાયત'નમ । આયત'નવાન ભવતિ । યઃ સં'વત્સરસ્યાયત'નં વેદ' । આયત'નવાન ભવતિ । આપો વૈ સં'વત્સરસ્યાયત'નં વેદ' । આયત'નવાન ભવતિ । ય એવં વેદ' । યો"ઽપ્સુ નાવં પ્રતિ'ષ્ઠિતાં વેદ' । પ્રત્યેવ તિ'ષ્ઠતિ ।

ઓં રાજાધિરાજાય' પ્રસહ્ય સાહિને" । નમો' વયં વૈ"શ્રવણાય' કુર્મહે । સ મે કામાન કામ કામા'ય મહ્યમ" । કામેશ્વરો વૈ"શ્રવણો દ'દાતુ । કુબેરાય' વૈશ્રવણાય' । મહારાજાય નમઃ' ।

ઓં" તદ્બ્રહ્મ । ઓં" તદ્વાયુઃ । ઓં" તદાત્મા ।
ઓં" તદ્સત્યમ । ઓં" તત્સર્વમ" । ઓં" તત-પુરોર્નમઃ ॥

www.YouSigma.com

અંતશ્ચરતિ ભૂતેષુ ગુહાયાં વિશ્વમૂર્તિષુ
ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વ-મિંદ્રસ્ત્વગ્મ
રુદ્રસ્ત્વં વિષ્ણુસ્ત્વં બ્રહ્મત્વં’ પ્રજાપતિઃ ।
ત્વં તદાપ આપો જ્યોતીરસોઽમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ ।

ઈશાનસ્સર્વ વિદ્યાનામીશ્વર સ્સર્વભૂતાનાં
બ્રહ્માધિપતિર-બ્રહ્મણોઽધિપતિર-બ્રહ્મા શિવો મે અસ્તુ સદા શિવોમ ।

તદ્વિષ્ણોઃ પરમં પદગ્મ સદા પશ્યંતિ
સૂરયઃ દિવીવચક્ષુ રાતતં તદ્વિ પ્રાસો
વિપસ્યવો જાગૃહાન સત્સમિંધતે
તદ્વિષ્ણોર્ય-ત્પરમં પદમ ।

ઋતગ્મ સત્યં પ’રં બ્રહ્મ પુરુષં’ કૃષ્ણપિંગ’લમ ।
ઊર્ધ્વરે’તં વિ’રૂપા’ક્ષં વિશ્વરૂ’પાય વૈ નમો નમઃ’ ॥

ઓં નારાયણાય’ વિદ્મહે’ વાસુદેવાય’ ધીમહિ ।
તન્નો’ વિષ્ણુઃ પ્રચોદયા’’ત ॥

ઓં શાંતિઃ શાંતિઃ શાંતિઃ’ ।

www.YouSigma.com